५ वाङ्भवम् ६ द्रौणी ७ त्रिकूटलवणम् ८ । अस्य गुणाः । पाकेनात्युष्णत्वम् । अविदाहित्वम् । भेदनत्वम् । स्निग्धत्वम् । शूलनाशित्वम् । अल्पपित्तत्वञ्च । इति राजनिर्घण्टः ॥

द्रोहः, पुं, (द्रुह् + भावे घञ् ।) जिघांसा । अनिष्टचिन्तनम् । तत्पर्य्यायः । अपक्रिया २ । इति हेमचन्द्रः ।३।१५१ ॥ यथा, कूर्म्मपुराणे ।
"देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः ॥"
(द्रुग्वधः । यथा, मनौ । ७ । ४८ ।
"पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् ।
वाग्दण्डजञ्चापि पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥"
"द्रोहश्छद्मवधः ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

द्रोहचिन्तनं, क्ली, (द्रोहस्य चिन्तनम् ।) परानिष्टचिन्ता । तत्पर्य्यायः । व्यापादः २ । इत्यमरः । १ । ५ । ४ ॥

द्रोहाटः, पुं, (द्रोहाय अटतीति । अट + अच् ।) गाथाप्रभेदः । मृगलुब्धकः । वैडालव्रतिकः । इति मेदिनी । टे, ४६ ॥

द्रोही, [न्] पुं, (द्रोहोऽस्यास्तीति इनिः । यद्वा, द्रुह्यतीति णिनिः ।) द्रोहकः । परानिष्टचिन्तकः । यथा,—
"मित्रद्रोही कृतघ्नश्च ये च विश्वासघातकाः ।
ते नरा नरके यान्ति यावच्चन्द्रदिवाकरौ ॥"
इति ससेमिरोपाख्यानम् ॥
(यथा च, कथासरित्सागरे । ५ । ६३ ॥
"तत्कृत्वाचिन्तयद्राजा नूनं द्रोही स एव मे ॥")

द्रौणायनः, पुं, (द्रोणस्यापत्यम् । द्रोण + फक् ।) अश्वत्थामा । इति त्रिकाण्डशेषः ॥

द्रौणिः, पुं, (द्रोणस्यापत्यम् । द्रोण + इञ् ।) अश्वत्थामा । इति शब्दरत्नावली ॥ (यथा, महाभारते । ४ । ५६ । ७४ ।
"आहत्य तु महाबाहुर्यतो द्रौणिस्ततो हयान् ॥"
अयं हि एकोनत्रिंशद्द्वापरयुगस्य व्यासः । यथा, देवीभागवते । १ । ३ । २५ ।
"एकोनत्रिंशत् संप्राप्ते द्रौणिर्व्यासो भविष्यति ॥")

द्रौणिकः, त्रि, (द्रोणस्य द्रोणपरिमितबीजस्य वापः इति । द्रोण + "तस्य वापः ।" ५ । १ । ४५ । इति ठञ् ।) द्रोणपरिमितबीजवपनयोग्यक्षेत्रम् । इत्यमरः ।२।९।१० ॥ (द्रोणेन क्रीतः । निष्कादित्वात् ठक् । द्रोणक्रीतः ॥ द्रोणं द्रोणपरिमितद्रव्यं पचतीति । द्रोण + "संभवत्यवहरति पचति ।" ५ । १ । ५२ । इति ठञ् । द्रोणपाचकः । इति सिद्धान्तकौमुदी ॥)

द्रौपदी, स्त्री, (द्रुपदस्यापत्यं स्त्री । द्रुपद + अण् । ङीप् ।) द्रुपदराजकन्या । तत्पर्य्यायः । पाञ्चाली २ कृष्णा ३ सैरिन्ध्री ४ नित्ययौवना ५ वेदिजा ६ याज्ञसेनी ७ । इति हेमचन्द्रः । ३ । ३७४ ॥ अस्याः पञ्चस्वामिकारणं यथा,—
वह्निरुवाच ।
"शृणु राम ! महाभाग ! सीतासंगोपनं कुरु ।
सप्ताहाभ्यन्तरे चैव रावणो दुष्टराक्षसः ।
दुर्निवार्य्यः प्राक्तनेन जानकीञ्च हरिष्यति ॥
राम उवाच ।
सीतां गृहीत्वा त्वं गच्छ छायाचैव तु तिष्ठतु ।
कलत्रवर्ज्जं कर्म्म सर्व्वेषाञ्च जुगुप्सितम् ॥
सीतां गृहीत्वा प्रययौ हव्यवाहो हुताशनः ।
सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ ॥
सा च छाया हृता पूर्व्वं रावणेन बलीयसा ।
समुद्धार तां रामो निहत्य तं सबान्धवम् ॥
वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह ।
अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम् ॥
सा च छाया तपश्चक्रे नारायणसरोवरे ।
तपश्चकार दिव्यञ्च शतवर्षञ्च शूलिनः ॥
वरं वृणुष्व भद्रे ! तमुवाच शङ्करश्च ताम् ।
उवाच सा शिवं व्यग्रा भर्त्तुर्दुःखेन दुःखिता ॥
पतिन्देहि पञ्चधा या वरं वव्रे त्रिलोचनम् ।
सर्व्वसम्पत्प्रदस्तुष्टस्तस्यै शर्व्वो वरं ददौ ॥
महादेव उवाच ।
साध्वि ! त्वं पञ्चधा ब्रूहि पतिन्देहीति व्याकुला ।
पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति प्रियास्तव ॥
ते च सर्व्वे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः ।
सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा ॥
कृते युगे वेदवती त्रेतायां जनकात्मजा ।
द्वापरे द्रौपदी छाया तेन कृष्णा त्रिहायणी ॥
वैष्णवी कृष्णभक्ता च तेन कृष्णा प्रकीर्त्तिता ।
स्वर्गलक्ष्मीर्भवेदिन्द्राणां सा च पश्चाद्भविष्यति ॥
राजा ददौ फाल्गुनाय कन्यायाञ्च स्वयंवरे ।
पप्रच्छ मातरं वीरो वस्तु प्राप्तं मयाधुना ॥
तमुवाच स्वयं माता गृहाण भ्रातृभिः सह ।
शम्भोर्वरेण पूर्व्वञ्च परत्र मातुराज्ञया ॥
द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः ।
चतुर्द्दशानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः ॥

द्वन्द्वं क्ली, (द्वन्द्व एवोदरादित्वात् वस्य लोपः ।) मिथुनम् । इति शब्दरत्नावली ॥

द्वन्द्वं, क्ली, (द्वौ द्वौ सहाभिव्यक्तौ । "द्वन्द्वं रहस्यमर्य्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु ।" ८ । १ । १५ । इति द्विशब्दस्य द्विर्व्वचनं पूर्व्वपदस्याम्भावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वञ्च निपात्यते ।) रहस्यम् । कलहः । (यथा, हितोपदेशे । ३ । ३२ ।
"शतं दद्यान्न विवदेदिति प्राज्ञस्य सम्मतम् ।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम् ॥")
मिथुनम् । (यथा, रघुः । १ । ४० ।
"परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥")
युग्मम् । इति मेदिनी । वे, १० ॥ (यथा, महाभारते । १ । १३७ । ९५ ।
"द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो ! ॥"
शीतोष्णादि । यथा, माघे । ४ । ६४ ।
"सर्व्वर्त्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि ॥")
दुर्गम् । (अत्र पुंस्त्वमपि ।) अथ द्वन्द्वयुक्तिः ।
"राज्ञो बलं न हि बलं द्वन्द्वमेव बलं बलम् ।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत् ॥"
तथा च ।
"एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते ॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत् ।
यद्देवरचितं द्वन्द्वं गिरिनद्यादिसंश्रितम् ।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम् ॥
प्राकारपरिखारण्यसंश्रयं यद्भवेदिह ।
कृत्रिमं नाम विज्ञेयं लक्ष्यालक्ष्यन्तु वैरिणाम् ॥"
तत्राकृत्रिमद्वन्द्वयुक्तिर्यथा,—
"अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः ।
सजलाश्रयसम्भारभोज्यद्रव्यसमाश्रयः ॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम् ।
नद्यो गभीरविस्तीर्णाश्चतुर्द्दिक्षु व्यवस्थिताः ॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते ।
यदन्यच्चिरकालीनं दुर्लङ्घ्यविपिनादिकम् ॥
तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते ।
वनद्वन्द्वमिति ख्यातं यथापूर्व्वं महत्तरम् ॥"
कृत्रिमद्वन्द्वयुक्तिर्यथा,—
"यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः ।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमाचरेत् ॥
गभीरलघ्या विस्तीर्णा गभीराः पूर्णवारयः ।
द्वन्द्वेन समादिष्टाः परिखा बहुयादसः ॥
विशालशालं सुघनं बहुकण्टकिसङ्कटम् ।
द्वन्द्वेन समादिष्टं विस्तीर्णं विषमं बलम् ॥
अधोऽधोवध्यमानोऽपि कन्दरोऽल्पजलं स्रवन् ।
द्वन्द्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम् ॥
सर्व्वतः परिखां कृत्वा निवसेदुपरि कन्दरम् ।
तज्जलप्लुतदेशत्वात् जलद्वन्द्वं तदुच्यते ॥
एषामभावे निम्नस्य भूप्रदेशस्य यत्नतः ।
वर्षासु प्रवते वारि जलद्वन्द्वं ततो भवेत् ॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत् ।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि ॥
अथवा कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्वसेत् ।
रथपतिर्यदा वैरी स्थलद्वन्द्वं सदाचरेत् ॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं सदाचरेत् ।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्विविधो रिपुः ॥
सर्व्वो हि त्रिविधो युद्धः समासादुपदिश्यते ।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च ॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम् ।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः ॥"
अथ सामान्यतो गुणाः ।
तथा हि । नीतिशास्त्रम् ।
"सप्रवेशापसरणं द्वन्द्वमुत्तममुच्यते ।
अन्यत्र वन्दिशालेव न तादृगबहुमाश्रयेत् ॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च ।
मनुष्यद्वन्द्वसंसर्गं षड्द्वन्द्वाः तानि षट् ॥"
अन्ये तु ।
"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्धृद्वन्द्वं प्रकीर्त्तितम् ।
योद्धृशून्यं हि यत् द्वन्द्वं मृतकायसमं हि तत् ॥"